# संस्कृतम् (कोड-सङ्ख्या - 122)
## आदर्श-प्रश्नपत्रम्
## कक्षा - दशमी (2025-26)

**अवधिः - होरात्रयम्** **अङ्कयोजना उत्तरसङ्केताश्च** **सम्पूर्णाङ्काः - 80**

**अवधातव्यम् -**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्। **(अयं नियमः नवम्यां कक्षायां अपि परिपालनीयः।)**
3. अनुच्छेदे श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

| | **खण्डः 'क' अपठितावबोधनम्** | |
|---|---|---|
| 1. | **गद्यांशः -** | 10 |
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** | 2×1=2 |
| | (i) श्वासमाध्यमेन | |
| | (ii) प्रदूषणसमस्यायाः | |
| | (iii) प्रदूषणम् | |
| | **आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)** | 2×2=4 |
| | (i) वायुप्रदूषणेन विविधाः श्वासरोगाः, हृदयरोगाः, चर्मरोगाः, नेत्ररोगाः भवन्ति। | |
| | (ii) अद्यत्वे जायमानैः युद्धैः, युद्धाभ्यासैः, यन्त्रालयानां यानानां च धूमेन सम्पूर्णवायुमण्डलं दूषितं सञ्जातम्। | |
| | (iii) प्रदूषणस्य निवारणाय वृक्षाः रोपणीयाः,उद्योगानां विस्तारः च वैज्ञानिकरीत्या करणीयः आयुद्धगतिविधयः निवारणीयाः। | |

| | | |
|---|---|---|
| | इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत -<br>**प्रदूषणम् / पर्यावरणस्य संरक्षणम्/ प्रदूषणसमस्या**<br>छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचितः निर्णयः करणीयः।<br>ई. यथानिर्देशम् उत्तरत -<br>(i) (घ) स्वच्छम्<br>(ii) (ख) जलम्<br>(iii) (घ) वायुः | 1<br><br><br>3×1=3 |
| | **खण्डः 'ख'       रचनात्मकं कार्यम्** | |
| 2. अ<br><br><br><br><br>आ | पत्रलेखनम् -<br>भवान् हितेशः। पितुः स्थानान्तरणवशात् भवान् असमप्रदेशात् दिल्लीनगरम् आगत्य नूतनविद्यालये प्रवेशं प्राप्तवान्। मञ्जूषायां दत्तानां पदानां सहायतया अस्य नगरस्य विद्यालयस्य च वर्णनं कुर्वन् मित्रं राघवेन्द्रं प्रति पत्रं लिखतु।<br>**अथवा**<br>भवती सुमेधा तिरुपतिस्थे राजकीये माध्यमिकविद्यालये दशमीकक्षायां पठति। भवती विद्यालयस्य शुल्कं दातुम् असमर्था अस्ति अतः मञ्जूषायां दत्तानां पदानां सहायतया शुल्कक्षमार्थं निवेदयन्ती प्रधानाचार्यां प्रति प्रार्थनापत्रं लिखतु।<br>छात्राः पूर्णं पत्रं लेखिष्यन्ति। शुद्धपत्राय पूर्णाङ्काः प्रदेयाः। व्याकरणसम्बद्ध-दोषेभ्यः आंशिक-रूपेणैव अङ्काः कर्तनीयाः न तु पूर्णाः। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते। | 5 |
| 3. अ<br><br><br><br><br><br><br><br>आ | चित्रवर्णनम् -<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते।<br>**अथवा**<br>अनुच्छेदलेखनम् -<br>अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः। | 5×1=5 |
| | | |

| | | |
|---|---|---|
| 4. | **अनुवादः -**<br>(i) अस्मिन् वैज्ञानिकयुगे बहवः आविष्काराः जाताः/अभवन्।<br>(ii) स्वस्थे शरीरे स्वस्थं मनः भवति।<br>(iii) रूसदेशस्य यूक्रेनदेशस्य च मध्ये युद्धं कदा समाप्तं भविष्यति?<br>(iv) तव स्वास्थ्यं कथम् अस्ति?<br>(v) कदापि अहङ्कारं मा कुरु/कुरुत। | 5×1=5 |
| | **खण्डः 'ग' अनुप्रयुक्तव्याकरणम्** | |
| 5.अ<br><br><br><br><br><br>आ | **सन्धिः सन्धिच्छेदश्च -**<br>(i) योजकः + तत्र<br>(ii) भवेद्येन<br>(iii) पुनरपि<br>(iv) खलु + एतत्<br>**अथवा**<br>**सन्धिः सन्धिच्छेदश्च -**<br>(i) पङ्क्तयः + हि<br>(ii) खग इव<br>(iii) कं + चिद्<br>(iv) सर्वेऽपि | 4×1=4 |
| | | |
| 6. | **समासः विग्रहः च -**<br>(i) (ख) महती च इयं देवी<br>(ii) (क) समानं शीलं व्यसनं येषां तेषु<br>(iii) (घ) मलेन सहितम्<br>(iv) (ग) कुशः च लवः च | 4×1=4 |
| | | |
| 7. | **प्रत्ययाः -**<br>(i) (घ) धैर्यवान्<br>(ii) (ख) भामिनी<br>(iii) (ग) रुग्ण + तल्<br>(iv) (क) कुप् + क्त | 4×1=4 |
| | | |
| 8. | **वाच्यम् -**<br>(i) (क) फलानि<br>(ii) (ख) अहम् | 3×1=3 |

| | | |
|---|---|---|
| | (iii) (ग) इच्छामि | |
| | | |
| 9. | **समयः -**<br>(i) चतुर्वादने<br>(ii) सपादपञ्चवादने<br>(iii) सार्धषड्वादने<br>(iv) पादोनाष्टवादने/पादोन-अष्टवादने | 4×1=4 |
| | | |
| 10. | **अव्ययपदानि -**<br>(i) यदि<br>(ii) इतस्ततः<br>(iii) अपि | 3×1=3 |
| 11. | **अशुद्धिसंशोधनम् -**<br>(i) (क) वृक्षाः<br>(ii) (ग) क्रुध्यति<br>(iii) (ग) अगच्छत् | 3×1=3 |
| | | |
| | **खण्डः 'घ' पठितावबोधनम्** | |
| 12. | **गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) भूमौ/क्षेत्रे<br>(ii) सुरभिः<br>(iii) पुत्रस्य<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) सुरभिः तस्मिन् पुत्रे एव विशिष्य आत्मवेदनामनुभवति यतो हि सः अन्येभ्यो दुर्बलः।<br>(ii) सुराधिपः सर्वप्रथमं सुरभिम् अपृच्छत्- "अयि शुभे ! किमेवं रोदिषि?"<br>(iii) भूमौ पतिते स्वपुत्रं दृष्ट्वा सुरभेः नेत्राभ्यामश्रूणि आविरासन्।<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) बहूनि<br>(ii) अहम्<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) वात्सल्यम्<br>(ii) वृषभाय | 5<br><br>2×½=1<br><br><br><br>2×1=2<br><br><br><br>2×1=2 |

| | | |
|---|---|---|
| | | |
| 13. | पद्यांशः<br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) परेभ्यः<br>(ii) शरीरे/मानवशरीरे/शरीरस्थः<br>(iii) उद्यमः<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) यः जनः सुखानि इच्छति सः कदापि परेभ्यः अहितं कर्म न कुर्यात्।<br>(ii) उद्यमं/परिश्रमं कृत्वा मानवः दुःखी न भवति।<br>(iii) मनुष्याणां महान् रिपुः आलस्यम् अस्ति।<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) सुखानि<br>(ii) इच्छति<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) रिपुः<br>(ii) बन्धुः | 5<br>2×½=1<br><br><br><br>2×1=2<br><br><br><br>2×1=2 |
| | | |
| 14. | अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -<br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) काकः<br>(ii) पक्षिणः<br>(iii) वानराः<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) वानरः सिंहं वनराजः भवितुं सर्वथाऽयोग्यं मन्यते यतोहि सः भक्षकः अस्ति, इतोऽपि सः आत्मरक्षायाम् असमर्थोऽपि अस्ति।<br>(ii) यः परैः पीड्यमानान् वित्रस्तान् न रक्षति सः पार्थिवरूपेण कृतान्तः मन्यते।<br>(iii) वानराः वारं वारं सिंहं तुदन्ति अतः किमपि कर्तुम् असमर्थः क्रुद्धः सः इतस्ततः धावति।<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) हर्षमिश्रितम्<br>(ii) भयम्<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>(i) भक्षकः | 5<br>2×½=1<br><br><br><br>2×1=2<br><br><br><br><br><br>2×1=2 |

| | | |
|---|---|---|
| | (ii) सिंहाय | |
| 15. | **प्रश्ननिर्माणं कुरुत -**<br>(i) चातकः **कं** जलं याचते?<br>(ii) बुद्धिमती **कस्य** गृहं प्रति चलिता?<br>(iii) अपूर्वोऽयं **केषां** सरस्वत्यवतारः?<br>(iv) **का** तूर्णं धाविता? | 4×1=4 |
| 16. अ | **अन्वयः -**<br>वायुमण्डलम् (i) **भृशम्** दूषितम् (अस्ति)। जलम् हि निर्मलम् न (अस्ति) (ii) **भक्ष्यम्** कुत्सितवस्तुमिश्रितम् (अस्ति), धरातलम् समलम् (अस्ति)। (iii) **जगति** बहिः अन्तः (च) तु बहु शुद्धीकरणम् (iv) **करणीयम्** (अस्ति)।<br>**अथवा** | 4×1=4 |
| आ | **भावार्थे रिक्तस्थानपूर्तिः -**<br>**भावार्थः-** हे सरोवर! (i) **त्वयि** सङ्कुचिते सति अर्थात् यदा त्वं शुष्कं जायमानः अस्ति तदा तव समीपस्थाः खगाः आकाशमार्गेण अन्यत्र गच्छन्ति। (ii) **भ्रमराः** आम्रपुष्पाणाम् आश्रयं स्वीकुर्वन्ति, किन्तु त्वयि स्थिताः दीनाः (iii) **मत्स्याः** कुत्र गच्छन्तु ? ते तु अत्रैव स्थास्यन्ति अन्यत्र कुत्रापि न (iv) **गमिष्यन्ति** । आपत्काले स्वामिभक्ता एव सह तिष्ठन्ति अन्ये स्वार्थिनः मैत्रीं त्यजन्ति। | |
| 17. | **कथा-क्रमानुसार-लेखनम् -**<br>(i) कश्चन निर्धनः जनः रुग्णं पुत्रं द्रष्टुं बसयानं विहाय पदातिरेव प्राचलत्।<br>(ii) मार्गे रात्रौ सः कस्यचित् गृहे आश्रयं प्राप्तवान्।<br>(iii) तस्मिन् गृहे रात्रौ कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।<br>(iv) चौरस्य पदध्वनिना अतिथिः प्रबुद्धः अभवत् धावित्वा तं चौरम् अगृह्णाच्च।<br>(v) आरक्षी एव तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागारे प्राक्षिपत्।<br>(vi) न्यायाधीशः पृथक्-पृथक् विवरणं श्रुतवान् किन्तु प्रमाणाभावात् निर्णेतुं नाशक्नोत्।<br>(vii) न्यायाधीशः पुनः तौ घटनायाः विषये वक्तुम् आदिष्टवान्।<br>(viii) न्यायाधीशः आरक्षिणे कारादण्डम् आदिश्य अतिथिं ससम्मानं मुक्तवान्। | 8×½=4 |
| 18. | **प्रसङ्गानुकूलम् उचितार्थम् -**<br>(i) (घ) शीघ्रम्<br>(ii) (ख) मुखे<br>(iii) (ग) कथितः | 3×1=3 |

-------------0000-------------